# Varadanartha Shiva Prarthana by Godavari

# गोदावरीकृता वरदानार्थ शिवप्रार्थना

## Document Information

Text title : Varadanartha Shiva Prarthana by Godavari and Tryambakesha Godavari Mahima Varnanam

File name : varadAnArthashivaprArthanAevaMtryambakeshagodAvarImahimavarNanamgodAvarIkRRitA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 22| 48-69||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# गोदावरीकृता वरदानार्थ शिवप्रार्थना

Varadanartha Shiva Prarthana by Godavari and Tryambakesha Godavari Mahima Varnanam

गोदावरीकृता वरदानार्थ शिवप्रार्थना एवं त्र्यम्बकेशगोदावरीमहिमवर्णनम्

गोदावरी -
त्वज्जटामूलतो देव गौतमार्थं विनिर्गता ।
देयो वरो मे भगवन्त्वत्कृपागौरवाच्छिव ॥ ४८॥

गङ्गा त्वदङ्गसङ्गेन त्वन्मौलिकृतकेतना ।
तस्यां तव रतिर्देव अविमुक्ते स्थितं त्वया ॥ ४९॥

विश्वेश्वर महालिङ्गरूपेण त्वं सदा स्थितः ।
नर्मदायामपि विभो लिङ्गरूपोऽसि शङ्कर ॥ ५०॥

गङ्गा मत्तोऽधिका वापि पावनी वा महेश्वर ।
वृद्धगङ्गाहमेवाद्य भवेयं त्वत्प्रसादतः ॥ ५१॥

मदम्बुकणसंस्पर्शात्साऽपि पूततमा भवेत् ।
त्वल्लिङ्गसेचने योग्या भवेयं वै महेश्वर ॥ ५२॥

इति देयो वरो मेऽद्य त्रियम्बक दयानिधे ।
(शिवगौरीसंवादे) ईश्वरः -
गोदावर्या तदा देवि मत्तः सम्प्रार्थितो वरः ॥ ५३॥

तस्यै मयोक्तं देवेशि तच्छृणुष्व त्वमादरात् ॥ ५४॥)
ईश्वरः -
त्वदम्बुलवसेकेन गङ्गा पूततमा भवेत् ।
सर्वदा मम पूज्या त्वं त्वत्तीरेऽहं सदा स्थितः ॥ ५५॥

वृद्धगङ्गासि नाम्ना त्वं भगिनी ते कनीयसी ।
गङ्गा पापौघशमनी त्वं च कैवल्यदा सदा ॥ ५६॥

त्वत्पाथोलवसेकेन गङ्गा हृष्टतरा भवेत् ।
गङ्गागोदावरीमिश्रं जलं मल्लिङ्गमस्तके ॥ ५७॥

यो ददाति नरो भक्त्या तस्मै मुक्तिं ददाम्यहम् ।
त्रियम्बकजटाजूटतटिनी पापघट्टिनी ॥ ५८॥

त्वयि स्नात्वा पूततमो भविष्यति न संशयः ।
त्वज्जलैर्यः पितॄन्देवि सन्तर्पयति पर्वणि ॥ ५९॥

तस्य षोडश वर्षाणि पितरस्तृप्तिमासते ।
किं पुनः श्राद्धकरणात्त्वत्तीरे पावने शुभे ॥ ६०॥

गोदावर्यां सकृत्स्नात्वा दृष्ट्वा श्रीत्र्यम्बकेश्वरम् ।
सर्वपापैर्विमुच्येत नात्र कार्या विचारणा ॥ ६१॥

ब्रह्मविष्ण्वादयो देवा मुनयश्चपै तापसाः ।
सिंहसंस्थे देवगुरौ तस्यां स्नान्ति च भक्तितः ॥ ६२॥

ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकैः ।
विमुच्येत नरः सद्यो गोदावर्यवगाहनात् ॥ ६३॥

श्रीमत्त्रियम्बकं दृष्ट्वा शतकृच्छ्रफलं लभेत् ।
अशीतिकृच्छ्रं स्नानं तद्गे दावर्यां वरानने ॥ ६४॥

सिंहसंस्थे देवगुरौ महादानफलादिकम् ।
सम्प्राप्नोति नरो गौरि गोदावर्यघमर्षणात् ॥ ६५॥

रुद्रसूक्तैर्महादेवमभिषिच्य त्रियम्बकम् ।
शतगोदानजं पुण्यं लभते नात्र संशयः ॥ ६६॥

गोदावरीजलं शुद्धं समं क्षीराभिषेचनैः ।
यस्तु बिल्वदलैः पूज्यं त्र्यम्बकेशं हि पूजयेत् ॥ ६७॥

तेन सर्वे कृता यज्ञास्तेन सर्वमनुष्ठितम् ।
नैवेद्यं यः शिवे दद्यात्तदनन्तफलं स्मृतम् ॥ ६८॥

(शिवगौरीसंवादे ईश्वरः -
इत्थं मत्तो वरं लब्ध्वा गङ्गा सा सागरङ्गमा ।
यः श्रृणोति सकृद्भक्त्या त्र्यम्बकाख्यानमुत्तमम् ॥ ६९॥

तस्य पापानि नश्यन्ति बहुजन्मार्जितान्युमे ।)

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे गोदावरीकृता वरदानार्थ शिवप्रार्थना अथवा त्र्यम्बकेशगोदावरीमहिमवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः २२। ४८-६९॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 22. 48-69..

Notes:

Having sprung from the dreadlocks of Shiva for fulfilling the request of Rishi Gautama, Godavari prays to Shiva for granting her a status in parity with other Rivers like Ganga and Narmada. Shiva grants that Godavari would be known as VriddhaGanga (Ganga being younger to her) and that while Ganga washes away sins, Godavari would be capable of bestowing Kaivalya. The combined waters of Ganga and Godavari, when offered to Shivalinga will be mokshakaraka.

He granted that Godavari water would be used for offering to Tryambekeshwara (Jyotir)Linga and bhakta-s will be benefitted by bathing in the waters of Godavari during Simhastha (time period when Guru/Brihaspati is in Simha Rasi).

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

*Varadanartha Shiva Prarthana by Godavari*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*